# শ্রীললিতাহৃদযস্তোত্রম্

{॥ শ্রীললিতাহৃদযস্তোত্রম্ ॥}

অথশ্রীললিতাহৃদযস্তোত্রং ॥

শ্রীললিতাংবিকাযৈ নমঃ ।

দেব্যুবাচ ।

দেবদেব মহাদেব সচ্চিদানন্দবিগ্রহা ।

সুন্দর্যাহৃদযং স্তোত্রং পরং কৌতূহলং বিভো ॥ ১॥

ঈশ্বরৌবাচ ।

সাধু সাধুত্বযা প্রাজ্ঞে লোকানুগ্রহকারকং ।

রহস্যমপিবক্ষ্যামি সাবধানমনাঃশৃণু ॥ ২॥

শ্রীবিদ্যাং জগতাং ধাত্রীং সর্গ্গস্থিতিলযেশ্বরীং ।

নমামিললিতাং নিত্যাং ভক্তানামিষ্টদাযিনীং ॥ ৩॥

বিন্দুত্রিকোণসম্যুক্তং বসুকোণসমন্বিতং ।

দশকোণদ্বযোপেতং চতুর্দ্দশ সমন্বিতং ॥ ৪॥

দলাষ্টকেসরোপেতং দলষোডশকান্বিতং ।

বৃত্তত্রযযান্বিতংভূমিসদনত্রযভূষিতং ॥ ৫॥

Stotram Digitalized By Sanskritdocuments.org

নমামি ললিতাচক্রং ভক্তানামিষ্টদায়কং ।

অমৃতাংভোনিধিংতত্র রত্নদ্বীপং নমাম্যহং ॥ ৬॥

নানাবৃক্ষমহোদ্যানং বন্দেহং কল্পবাটিকাং ।

সন্তানবাটিকাংবন্দে হরিচন্দনবাটিকাং ॥ ৭॥

মন্দারবাটিকাং পারিজাতবাটীং মুদা ভজে ।

নমামিতব দেবেশি কদংববনবাটিকাং ॥ ৮॥

পুষ্যরাগমহারত্নপ্রাকারং প্রণমাম্যহং ।

পত্মরাগাদিমণিভিঃপ্রাকারং সর্ব্বদা ভজে ॥ ৯॥

গোমেদরত্নপ্রাকারং বজ্রপ্রাকারমাশ্রয়ে ।

বৈডূর্যরত্নপ্রাকারংপ্রণমামি কুলেশ্বরী ॥ ১০॥

ইন্দ্রনীলাখ্যরত্নানাং প্রাকারং প্রণমাম্যহং ।

মুক্তাফলমহারত্নপ্রাকারংপ্রণমাম্যহং ॥ ১১॥

মরতাখ্যমহারত্নপ্রাকারায নমোনমঃ ।

বিদ্রুমাখ্যমহারত্নপ্রাকারংপ্রণমাম্যহং ॥ ১২॥

মাণিক্যমণ্ডপং রত্নসহস্রস্তংভমণ্ডপং ।

ললিতে!তবদেবেশি ভজাম্যমৃতবাপিকাং ॥ ১৩॥

আনন্দবাপিকাং বন্দেবিমর্শবাপিকাং ভজে ।

ভজেবালাতপোল্লারং চন্দ্রিকোগারিকাং ভজে ॥ ১৪॥

মহাশৃংগারপরিখাং মহাপত্মাটবীং ভজে ।

চিন্তামণিমহারত্নগৃহরাজং নমাম্যহং ॥ ১৫॥

পূর্বাংনাযমযং পূর্ব্বদ্বারং দেবি নমাম্যহং ।

দক্ষিণাংনাযরূপংতেদক্ষিণদ্বারমাশ্রযে ॥ ১৬॥

নমামি পশ্চিমদ্বারং পশ্চিমাম্নায রূপকং ।

বন্দেহমুত্তরদ্বারমুত্তরাম্নাযরূপকং ॥ ১৭॥

ঊর্দ্ধ্বাম্নাযমযং বন্দে হ্যূর্দ্ধদ্বারং কুলেশ্বরি ।

ললিতেতব দেবেশি মহাসিংহাসনং ভজে ॥ ১৮॥

ব্রহ্মাত্মকং মঞ্চপাদমেকং তব নমাম্যহং ।

একংবিষ্ণুমযং মঞ্চপাদমন্যং নমাম্যহং ॥ ১৯॥

একং রুদ্রমযং মঞ্চপাদমন্যং নমাম্যহং ।

মঞ্চপাদংমমাম্যেকং তব দেবীশ্বরাত্মকং ॥ ২০॥

মঞ্চৈকফলকং বন্দে সদাশিবময়ং শুভং ।

নমামিতেহংসতূলতল্পকং পরমেশ্বরী! ॥ ২১॥

নমামিতে হংসতূলমহোপাধানমুত্তমং ।

কৌস্তুভাস্তরণংবন্দে তব নিত্যং কুলেশ্বরী ॥ ২২॥

মহাবিতানিকাং বন্দে মহাযবিনিকাং ভজে ।

এবংপূজাগৃহং ধ্যাত্বা শ্রীচক্রে শ্রীশিবাং ভজে ॥ ২৩॥

স্বদক্ষিণে স্থাপযামি ভাগে পুষ্পাক্ষতাদিকান্ ।

অমিতাংস্তেমহাদেবি দীপান্ সন্দর্শযাম্যহং ॥ ২৪॥

মূলেন ত্রিপুরাচক্রং তব সম্পূজ্যযাম্যহং ।

ত্রিভিঃখৈস্তুবখ্যাতৈঃ পূজযামি মহেশ্বরি! ॥ ২৫॥

বায্বগ্নি জলসম্যুক্তং প্রাণাযামৈরহং শিবে ।

শোষাণাংদাহনং চৈব করোমি প্লাবনং তথা ॥ ২৬॥

ত্রিবারং মূলমন্ত্রেণ প্রাণাযামং করোম্যহং ।

পাষণ্ডকারিণোভূতা ভূমৌযে চান্তরিক্ষকে ॥ ২৭॥

করোম্যনেন মন্ত্রেণ তালত্রযমহং শিবে ।

নারাযণোহংব্রহ্মাহং ভৈরবোহং শিবোস্ম্যহং ॥ ২৮॥

দেবোহং পরমানন্দোস্ম্যহং ত্রিপুরসুন্দরি ।
ধ্যাত্বাবৈ বজ্রকবচং ন্যাসং তব করোম্যহং ॥ ২৯॥

কুমারীবীজসম্যুক্তং মহাত্রিপুরসুন্দরি! ।
মাংরক্ষরক্ষেতি হৃদি করোম্যঞ্জলিমীশ্বরি! ॥ ৩০॥

মহাদেব্যাসনাযেতি প্রকরোম্যাসনং শিবে ।
চক্রাসনংনমস্যামি সর্ব্বমন্ত্রাসনং শিবে ॥ ৩১॥

সাধ্ধ্যসিদ্ধাসনং মন্ত্রৈরেভির্যুক্তং মহেশ্বরি ।
করোম্যস্মিন্চক্রমন্ত্রৈর্দেবতাসনমুত্তমং ॥ ৩২॥

করোম্যথ ষডংগাখ্যং মাতৃকাং চ কলাং ন্যসে ।
শ্রীকণ্টংকেশবং চৈব প্রপঞ্চং যোগমাতৃকাং ॥ ৩৩॥

তত্বন্যাসং ততঃ কূর্ব্বে চতুষ্পীটং যথাচরে ।
লঘুষোঢাংততঃ কূর্ব্বে শক্তিন্যাসং মহোত্তমং ॥ ৩৪॥

পীটন্যাসং ততঃ কুর্বে দেবতাবাহনং প্রিযে ।
কুংকুমন্যাসকংচৈব চক্রন্যাসমথাচরে ॥ ৩৫॥

চক্রন্যাসং ততঃ কুর্ব্বে ন্যাসং কামকলাদ্বযং ।

ষোডশার্ণমহামন্ত্রৈরংগন্যাসংকরোম্যহং ॥ ৩৬॥

মহাষোঢাং ততঃ কুর্ব্বে শাংভবং চ মহাপ্রিযে ।

ততোমূলংপ্রজপ্ত্বাথ পাদুকাঞ্চ ততঃ পরং ॥ ৩৭॥

গুরবে সম্যগর্চ্যাথ দেবতাং হৃদিসংভজে ।

করোমিমণ্ডলং বৃত্তং চতুরশ্রং শিবপ্রিযে ॥ ৩৮॥

পুষ্পৈরভ্যর্চ্চ্যসাধারং শংখং সম্পূজযামহং ।

অর্চ্চযামিষডংগেন জলমাপূরযাম্যহং ॥ ৩৯॥

দদামি চাদিমং বিন্দুং কুর্বে মূলাভিমন্ত্রিতং ।

তজজলেনজগন্মাতস্ত্রিকোণং বৃত্তসম্যুতং ॥ ৪০॥

ষট্কোণং চতুরশ্রঞ্চ মণ্ডলং প্রণমাম্যহং ।

বিদ্যাপূজযামীহ ত্রিখণ্ডেন তু পূজনং ॥ ৪১॥

বীজেনবৃত্তষট্কোণং পূজযামি তবপ্রিযে ।

তস্মিন্দেবীকলাত্মানাং মণিমণ্ডলমাশ্রযে ॥ ৪২॥

ধূম্রার্চ্চিষং নমস্যামি ঊষ্মাং চ জ্বলনীং তথা ।

জ্বালিনীংচ নমস্যামি বন্দেহং বিস্পুলিংগিনীং ॥ ৪৩॥

সুশ্রিযং চ সুরূপাঞ্চকংপিলাং প্রণমাম্যহং ।

নৌমিহব্যবহাং নিত্যাং ভজে কব্যবহাং কলাং ॥ ৪৪॥

সূর্যাগ্নিমণ্ডলাং তত্র সকলাদ্বাদশাত্মকং ।

অর্ঘ্যপাদ্যমহংতত্র তপিনীং তাপিনীং ভজে ॥ ৪৫॥

ধূম্রাং মরীচীং বন্দেহং জ্বালিনীং মরুহং ভজে ।

সুষুম্নাংভোগদাং বন্দে ভজে বিশ্বাং চ বোধিনীং ॥ ৪৬॥

ধারিণীং চ ক্ষমাং বন্দে সৌরীরেতাঃ কলাভজে ।

আশ্রযেমণ্ডলং চান্দ্রং তল্কলাষোডশাত্মকং ॥ ৪৭॥

অমৃতাং মানদাং বন্দে পূষাং তুষ্টীং ভজাম্যহং ।

পুষ্টিংভজে মহাদেবি ভজেহং চ রতিং ধৃতিং ॥ ৪৮॥

রশনিং চন্দ্রিকাং বন্দে কান্তীং জোৎসনা শ্রিযং ভজে ।

নেঔমিপ্রীতিঞ্চাগতদাঞ্চপূর্ন্নিমামমৃতাংভজে ॥ ৪৯॥

ত্রিকোণলেখনং কুর্ব্বে আকারাদিসুরেখকং ।

হলক্ষবর্ণ্ণসম্যুক্তংস্পীতং তং হংসভাস্করং ॥ ৫০॥

বাক্কামশক্তি সংযুক্তং হংসমারাধযাম্যহং ।

বৃত্তাদ্বহিঃষডশ্রস্যালেখনং প্রকরোম্যহং ॥ ৫১॥

পুরতোগ্ন্যাদিষল্োণং কখগেনার্চ্চযাম্যহং ।

শ্রীবিদ্যাসপ্তবারং করোম্যত্রাভি মন্ত্রিতং ॥ ৫২॥

সমর্প্পযামি দেবেশি তস্মাত্ গন্ধাক্ষতাদিকং ।

ধ্যাযামিপূজাদ্রব্যেষু তত্ সর্ব্বং বিদ্যাযুতং ॥ ৫৩॥

চতুর্ন্নবতিসন্মন্ত্রান্ স্পৃষ্ট্বা তত্ প্রজপাম্যহং ।

বহ্নের্দ্দশকলাঃসূর্যকলাদ্বাদশকং ভজে ॥ ৫৪॥

আশ্রযে শোডষকলাস্তত্র চন্দ্রমসস্তদা ।

সৃষ্টিঋৃদ্ধিম্ স্মৃতিম্ বন্দে মেধাম্ কান্তীম্ তথৈব চ ॥ ৫৫॥

লক্ষ্মীম্ দ্যুথিম্ স্থিতাম্ বন্দে স্থিতিম্ সিদ্ধিম্ ভজাম্যহম্ ।

এতাব্রহ্মকলাবন্দে জরান্থাম্ পালিনীম্ ভজে ॥ ৫৬॥

শান্তিং নমামীশ্বরীং চ রতীং বন্দে চ কারিকাং ।

বরদাংহ্লাদিনীং বন্দে প্রীতিং দীর্ঘাং ভজাভম্যহং ॥ ৫৭॥

এতা বিষ্ণুঅকলাবন্দে তীক্ষ্ণাং রৌদ্রিং ভযাং ভজে ।

নিদ্রাংতন্দ্রীং ক্ষুধাং বন্দে নমামি ক্রোধিনীং ক্রিযাং ॥ ৫৮॥

উল্কারীং মৃত্যুরূপাং চ এতা রুদ্রকলা ভজে ।
নীলাংপীতাং ভজে শ্বেতাং বন্দেহমরুণাং কলাং ॥ ৫৯॥

অনন্তখ্যাং কলাঞ্চেতি ঈশ্বরস্য কলাভজে ।
নিবৃত্তিঞ্চপ্রতিষ্ঠাঞ্চবিদ্যাংশান্তিং ভজাম্যহং ॥ ৬০॥

রোধিকাং দীপিকাং বন্দে রেচিকাং মোচিকাং ভজে ।
পরাংসূক্ষ্মামৃতাং সূক্ষ্মাং প্রণামি কুলেশ্বরি! ॥ ৬১॥

জ্ঞানাখ্যাঞ্চনমস্যামি নৌমিজ্ঞানামৃতাং কলাং ।
আপ্যাযিনীংব্যাপিনীং চ মোদিনীং প্রণমাম্যহং ॥ ৬২॥

কলাঃ সদাশিবস্যৈতাঃ ষোডশ প্রণমাম্যহং ।
বিষ্ণুযোনিংনমস্যামি মূলবিদ্যাং নমাম্যহং ॥ ৬৩॥

ত্রৈযংবকম্ নমস্যামি তদ্বিষ্ণুম্ প্রণমাম্যহম্ ।
বিষ্ণুযোনিন্নমস্যামি মূলবিদ্যাম্ নমাম্যহম্ ॥ ৬৪॥

অমৃতং মন্ত্রিতং বন্দে চতুর্ন্নবতিভিস্তথা ।
অখণ্ডৈকরসানন্দকরেপরসুধাত্মনি ॥ ৬৫॥

স্বচ্ছন্দস্পপুরণং মন্ত্রং নীধেহি কুলরূপিণি ।
অকুলস্থামৃতাকারেসিদ্ধিজ্ঞানকরেপরে ॥ ৬৬॥

অমৃতং নিধেহ্যস্মিন্ বস্তুনিক্লিন্নরূপিণি ।
তদ্রূপাণেকরস্যত্বংকৃত্বাহ্যেতত্ স্বরূপিণি ॥ ৬৭॥

ভূত্বা পরামৃতাকারমযি চিত্ স্পুরণং কুরু ।
এভির্ম্মনূত্তমৈর্বন্দেমন্ত্রিতং পরমামৃতং ॥ ৬৮॥

জোতিম্মযমিদং বন্দে পরমর্ঘ্যঞ্চ সুন্দরি ।
তদ্বিন্দুভির্মেশিরসি গুরুং সন্তর্প্পযাম্যহং ॥ ৬৯॥

ব্রহ্মাস্মিন্ তদ্বিন্দুং কুণ্ডলিন্যাং জুহোম্যহং ।
হৃচ্চক্রস্তাং-মহাদেবীংমহাত্রিপুরসুন্দরীং ॥ ৭০॥

নিরস্তমোহতিমিরাং সাক্ষাত্ সংবিত্ স্বরূপিণীং ।
নাসাপুটাৎপরকলামথনির্গ্গমযাম্যহং ॥ ৭১॥

নমামিযোনিমদ্ধ্যাস্থাং ত্রিখণ্ডকুসুমাংঞ্জলিং ।
জগন্মাতর্মহাদেবিযন্ত্রেত্বাং স্থাপযাম্যহং ॥ ৭২॥

সুধাচৈতন্যমূর্ত্তীং তে কল্পযামিমনুং তব ।

অনেনদেবিমন্ত্রযন্ত্রেত্বাং স্থাপযাম্যহং ॥ ৭৩॥

মহাপত্মবনান্তস্থে কারণানন্তবিগ্রহে ।
সর্বভূতহিতেমাতরেহ্যপি পরমেশ্বরি ॥ ৭৪ ॥

দেবেশী ভকতসুলভে সর্ব্বাভরণভূষিতে ।
যাবত্বংপূজযামীহতাবত্ত্বং সুস্থিরাভব ॥ ৭৫॥

অনেন মন্ত্রযুগ্মেন ত্বামত্রাবাহযাম্যহং ।
কল্পযামিনমঃ পাদমর্ঘ্যং তে কল্পযাম্যহং ॥ ৭৬॥

গন্ধতৈলাভ্যঞ্জনঞ্চমজ্জশালাপ্রবেশং ।
কল্পযামিনমস্তস্মৈ মণিপীঠোপ্রবেশনং ॥ ৭৭॥

দিব্যস্নানীযমীশানি গৃহাণোদ্বর্ত্তনং শুভে ।
গৃহাণোষ্ণাদকস্নানংকল্পযাম্যভিষেচনং ॥ ৭৮॥

হেমকুংভাযুতৈঃ স্নিগ্ন্দ্ধৈঃ কল্পযাম্যভিষেচনং ।
কল্পযামিনমস্তুভ্যং ধএঔতেন পরিমার্জ্জনং ॥ ৭৯॥

বালভানু প্রতীকাশং দুকূলং পরিধানকং ।
অরুণেনদুকুলেনোত্তরীযং কল্পযাম্যহং ॥ ৮০॥

প্রবেশনং কল্পযামি সর্বাংগানি বিলেপনং ।

নমস্তেকল্পযাম্যত্র মণিপীঠোপবেশনং ॥ ৮১ ॥

অষ্টগন্ধৈঃ কল্পযামি তবলেখনমংবিকে ।

কালাগরুমহাধূপংকল্পযামি নমশ্শিবে ॥ ৮২ ॥

মল্লিকামালাতীজাতি চংপকাদি মনোরমৈঃ ।

অর্চ্চিতাংকুসুমৈর্ম্মালাং কল্পযামি নমশ্শিবে ॥ ৮৩॥

প্রবেশনং কল্পযামি নমো ভূষণমণ্ডপে ।

উপবেশ্যংরত্নপীঠে তত্রতে কল্পযাম্যহং ॥ ৮৪ ॥

নবমাণিক্যমকুটং তত্রতে কল্পযাম্যহং ।

শরচ্চন্দ্রনিভংযুক্তং তচ্চন্দ্রশকলং তব ॥ ৮৫ ॥

তত সীমন্তসিন্দূরং কস্তূরীতিলকং তব ।

কালাজ্ঞনংকল্পযামি পালীযুগলমুত্তমং ॥ ৮৬॥

মণিকুণ্ডলযুগ্মঞ্চ নাসাভরণমীশ্বরী! ।

তাটঙ্কযুগলংদেবি ললিতে ধারযাম্যহং ॥ ৮৭॥

অথাদ্যাং ভূষণং কণ্ঠে মহাচিন্তাকমুত্তমং ।

পদকংতে কল্পযামি মহাপদকমুত্তমং ॥ ৮৮॥

মুক্তাবলীং কল্পযামি চৈকাবলি সমন্বিতাং ।
ছন্নবীরঞ্চকেযূরযুগলানাং চতুষ্টযং ॥ ৮৯॥

বলযাবলিমালানীং চোর্মিকাবলিমীশ্বরি ।
কাঞ্চীদামকটীসূত্রংসৌভগ্যাভরণং চ তে ॥ ৯০॥

ত্রিপুরে পাদকটকং কল্পযে রত্ননূপুরং ।
পাদাংগুলীযকংতুভ্যং পাশমেকং করেতব ॥ ৯১॥

অন্যে করেঙ্কুশং দেবি পূণ্ড্রেক্ষুধনুষং তব ।
অপরেপুষ্পবাণঞ্চ শ্রীমন্মাণিক্যপাদুকে ॥ ৯২॥

তদাবরণ দেবেশি মহামঞ্চাদিরোহণং ।
কামেশ্বরাঙ্কপর্যঙ্কমুপবেশনমুত্তমং ॥ ৯৩॥

সুধযা পূর্ণচষকং ততস্তত্ পানমুত্তমং ।
কর্পূরবীটিকাংতুভ্যং কল্পযামি নমঃ শিবে ॥ ৯৪॥

আনন্দোল্লাসবিলসদ্ধংসং তে কল্পযাম্যহং ।
মংগলারাত্রিকংবন্দে ছত্রং তে কল্পযাম্যহং ॥ ৯৫॥

চামরং যূগলং দেবিদর্প্পণং কল্পযাম্যহং ।

তালব্রিন্তংকল্পযামিগন্ধপুষ্পাক্ষতৈরপি ॥ ৯৬॥

ধূপং দীপশ্চনৈবেদ্যং কল্পযামি শিবপ্রিযে ।

অথাহংবৈন্দবে চক্রে সর্বানন্দমযাত্মকে ॥ ৯৭॥

রত্নসিংহাসনে রম্যে সমাসীনাং শিবপ্রিযাং ।

উদ্যদ্ভানুসহস্রাভাংজপাপুষ্পসমপ্রভাং ॥ ৯৮॥

নবরত্নপ্রভাযুক্তমকুটেন বিরাজিতাং ।

চন্দ্ররেখাসমোপেতাংকস্তূরিতিলকাঙ্কিতাং ॥ ৯৯॥

কামকোদণ্ডসৌন্দর্যনির্জ্জিতভ্রঊলতাযুতাং ।

অঞ্জনাঞ্চিতনেত্রান্তুপত্মপত্রনিভেষণাং ॥ ১০০॥

মণিকুণ্ডলসম্যুক্ত কর্ণদ্বযবিরাজিতাং ।

তাংবূলপূরিতমুখীংসুস্মিতাস্যবিরাজিতাং ॥ ১০১॥

আদ্যভূষণসম্যুক্তাং হেমচিন্তাকসংযুতাং ।

পদকেনসমোপেতাং মহাপদকসংযুতাং ॥ ১০২॥

মুক্তাফলসমোপেতামেকাবলিসমন্বিতাং ।

কৌসুভাংগদসংযুক্তচতুর্Bআহুসমন্বিতাং ॥ ১০৩॥

অষ্টগন্ধসমোপেতাং শ্রীচন্দনবিরাজিতাং ।

হেমকুংভোপমপ্রখ্যস্তনদ্বন্দবিরাজিতাং ॥ ১০৪॥

রক্তবস্ত্রপরীধানাং রক্তকঞ্চুকসংযুতাং ।

সূক্ষ্মরোমাবলিযুক্ততনুমদ্ধ্যবিরাজিতাম্ ॥ ১০৫॥

মুক্তামাণিক্যখচিত কাঞ্চীযুতনিতংবনীং ।

সদাশিবাঙকস্থবৃহন্মহাজঘনমণ্ডলাম্ ॥ ১০৬॥

কদলিস্তংভসংরাজদূরুদ্বযবিরাজিতাং ।

কপালীকান্তিসংকাশজংঘাযুগলশোভিতাম্ ॥ ১০৭॥

গূঢগুল্ফদ্বেযোপেতাং রক্তপাদসমন্বিতাং ।

ব্রহ্মবিষ্ণুমহেশাদিকিরীটস্ফূর্জ্জিতাংঘ্রিকাম্ ॥ ১০৮॥

কান্ত্যা বিরাজিতপদাং ভক্তত্রাণ পরাযণাং ।

ইক্ষুকার্মুকপুষ্পেষুপাশাঙ্কুশধরাংশুভাং ॥ ১০৯॥

সংবিত্ স্বরূপিণীং বন্দে ধ্যাযামি পরমেশ্বরীং ।

প্রদর্শযাম্যথশিবেদশামুদ্রাঃ ফলপ্রদাঃ ॥ ১১০॥

ত্বাং তর্প্পযামি ত্রিপুরে ত্রিধনা পার্ব্বতি ।

অগ্নএঔমহেশদিগ্ভাগে নৈরৃত্র্যাং মারুতে তথা ॥ ১১১॥

ইন্দ্রাশাবারুণী ভাগে ষডংগান্যর্চ্চযে ক্রমাত্ ।

আদ্যাংকামেশ্বরীং বন্দে নমামি ভগমালিনীং ॥ ১১২॥

নিত্যক্লিন্নাং নমস্যামি ভেরুণ্ডাং প্রণমাম্যহং ।

বহ্নিবাসাংনমস্যামি মহাবিদ্যেশ্বরীং ভজে ॥ ১১৩॥

শিবদূতিং নমস্যামি ত্বরিতাং কুল সুন্দরীং ।

নিত্যাংনীলপতাকাঞ্চ বিজযাং সর্ব্বমংগলাং ॥ ১১৪॥

জ্বালামালাঞ্চ চিত্রাঞ্চ মহানিত্যাং চ সংস্তুবে ।

প্রকাশানন্দনাথাখ্যাংপরাশক্তিনমাম্যহং ॥ ১১৫॥

শুক্লদেবীং নমস্যামি প্রণমামি কুলেশ্বরীং ।

পরশিবানন্দনাথাখ্যাংপরাশক্তি নমাম্যহং ॥ ১১৬॥

কৌলেশ্বরানন্দনাথং নৌমি কামেশ্বরীং সদা ।

ভোগানন্দংনমস্যামি সিদ্ধৌঘঞ্চ বরাননে ॥ ১১৭॥

ক্লিন্নানন্দং নমস্যামি সমযানন্দমেবচ ।

Stotram Digitalized By Sanskritdocuments.org

সহজানন্দনাথঞ্চপ্রণমামি মুর্ম্মুহু ॥ ১১৮॥

মানবৌঘং নমস্যামি গগনানন্দগপ্যহং ।

বিশ্বানন্দংনমস্যামি বিমলানন্দমেবচ ॥ ১১৯॥

মদনানন্দনাথঞ্চ ভুবনানন্দরূপিণীং ।

লীলানন্দংনমস্যামি স্বাত্মানন্দং মহেশ্বরি ॥ ১২০॥

প্রণমামিপ্রিযানন্দং সর্ব্বকামফলপ্রদং ।

পরমেষ্ঠিগুরুংবন্দে পরমংগুরুমাশ্রযে ॥ ১২১॥

শ্রীগুরুং প্রণমস্যামি মূর্দ্ধ্নি ব্রহ্মবিলেশ্বরীং ।

শ্রীমদানন্দনাথাখ্যশ্রিগুরোপাদুকাং তথা ॥ ১২২॥

অথ প্রাথমিকে দেবি চতুরশ্রে কুলেশ্বরি ।

অণিমাংলখিমাং বন্দে মহিমাং প্রণমাম্যহং ॥ ১২৩॥

ঈশিত্বসিদ্ধিং কলযে বশিত্বং প্রণমাম্যহং ।

প্রাকাম্যসিদ্ধিংভুক্তিঞ্চ ইচ্ছাপ্রাপ্তিমহং ভজে ॥ ১২৪॥

সর্ব্বকামপ্রদাং সর্ব্বকামসিদ্ধিমহং ভজে ।

মদ্ধ্যমেচতুরশ্রেহং ব্রাহ্মীং মাহেশ্বরীং ভজে ॥ ১২৫॥

কৌমারীং বৈষ্ণবীং বন্দে বারাহীং প্রণমাম্যহং ।

মাহেন্দ্রীমপিচামুণ্ডাংমহালক্ষ্মীমহং ভজে ॥ ১২৬॥

তৃতীযে চতুরশ্রে তু সর্ব্বসংক্ষোভিণীং ভজে ।

সর্ব্ববিদ্রাপিণীংমুদ্রাং সর্ব্বাকর্ষিণিকাং ভজে ॥ ১২৭॥

মুদ্রাং বশঙ্করীং বন্দে সর্ব্বোন্মাদিনিকাং ভজে ।

ভজেমহাঙ্কুশাং মুদ্রাং খেচরীং প্রণমাম্যহং ॥ ১২৮॥

বীজামুদ্রাং যোনিমুদ্রাং ভজে সর্ব্বত্রিখণ্ডিনীং ।

ত্রৈলোক্যমোহনংচক্রং নমামি ললিতে তব ॥ ১২৯॥

নমামি যোগিনীং তত্র প্রখটাখ্যামভীষ্টদাং ।

সুধার্ণ্ণবাসনংবন্দে তত্র তে পরমেশ্বরি ॥ ১৩০॥

চক্রেশ্বরি মহং বন্দে ত্রিপুরাং প্রণমাম্যহং ।

সর্ব্বসংক্ষোভিণীংমুদ্রাং ততোহং কলযে শিবে ॥ ১৩১॥

অথাহং ষোডশদলে কামাকর্ষিণিকাং ভজে ।

বুদ্ধ্যাকর্ষিণিকাংবন্দেহঙ্কারাকর্ষিণিকাং ভজে ॥ ১৩২॥

শব্দাকর্ষিণিকাং বন্দে স্পর্শাকর্ষিণিকাং ভজে ।

রূপাকর্ষিণিকাংবন্দে রসাকর্ষিণিকাং ভজে ॥ ১৩৩॥

গন্ধাকর্ষিণিকাং বন্দে চিত্তাকর্ষিণিকাং ভজে ।

ধৈর্যাকর্ষিণিকাংবন্দে স্মৃত্যাকর্ষিণিকাং ভজে ॥ ১৩৪॥

নামাকর্ষিণিকাং বন্দে বীজাকর্ষিণিকাং ভজে ।

আত্মাকর্ষিণিকাংবন্দে অমৃতাকর্ষিণিকাং ভজে ॥ ১৩৫॥

শরীরাকর্ষিণিকাং বন্দে নিত্যাং শ্রীপরমেশ্বরি ।

সর্ব্বাশাপূরকংবন্দে কল্পযেহং তবেশ্বরি ॥ ১৩৬॥

গুপ্তাখ্যাং যোগিনীং বন্দে মাতরং গুপ্তপূজ্যতাং ।

পোতাংবুজাসনংতত্র নমামি ললিতে তব ॥ ১৩৭॥

ত্রিপুরেশীং নমস্যামি ভজামিষ্টার্থসিদ্ধিদাং ।

সর্ব্ববিদ্রাবিণিমুদ্রাংতত্রাহং তে বিচন্তযে ॥ ১৩৮॥

সিবে তবাষ্টপত্রেহমনংগকুসুমাং ভজে ।

অনংগমেখলাংবন্দে অনংগমদনাং ভজে ॥ ১৩৯॥

নমোহং প্রণস্যামি অনংগমদনাতুরাং ।

অনংগরেখাংকলযে ভজেনংগাং চ বেগিনীং ॥ ১৪০॥

অনংগাকুশাং বন্দেহ মনংগমালিনীং ভজে ।

তত্রাহংপ্রণস্যামি দেব্যা আসনমুত্তমং ॥ ১৪১॥

নমামি জগতীশানীং তত্র ত্রিপুরসুন্দরীং ।

সর্ব্বাকর্ষিণিকাংমুদ্রাং তত্রাহ কলপযামিতে ॥ ১৪২॥

ভুবনাশ্রযে তব শিবে সর্ব্বসংক্ষোভিণীং ভজে ।

সর্ব্ববিদ্রাবিণীংবন্দে সর্ব্বকর্ষিণিকাং ভজে ॥ ১৪৩॥

সর্ব্বহ্লাদিনীং বন্দে সর্ব্বসম্মোহিনীং ভজে ।

সকলস্তংভিনীং বন্দে কলযে সর্ব্বজৃংভিণীং ॥ ১৪৪॥

বশঙ্করীং নমস্যামি সর্ব্বরঞ্জিনিকাং ভজে ।

সকলোন্মদিনীংবন্দে ভজে সর্ব্বার্থসাধকে ॥ ১৪৫॥

সম্পত্তিপুরিকাং বন্দে সর্ব্বমন্ত্রমযীং ভজে ।

ভজাম্যেবততশ্শক্তিং সর্ব্বদ্বন্দ্বক্ষ্যঙ্করীং ॥ ১৪৬॥

তত্রাহং কলযে চক্রং সর্ব্বসৌভাগ্যদাযকং ।

নমামিজগতাং ধাত্রীং সম্প্রদাযাখ্যযোগিনিং ॥ ১৪৭॥

নমামি পরমেশানীং মহাত্রিপুরবাসিনিং ।

কলযেহংতব শিবে মুদ্রাং সর্ব্বশঙ্করীং ॥ ১৪৮॥

বহির্দ্দশারে তে দেবি সর্ব্বসিদ্ধিপ্রদাং ভজে ।

সর্ব্বসম্পৎপ্রদাং বন্দে সর্ব্বপ্রিযংকরীং ভজে ॥ ১৪৯॥

নমাম্যহং ততো দেবীং সর্ব্বমংগলকারিণীং ।

সর্ব্বকামপ্রদাংবন্দে সর্ব্বদুঃখবিমোচিনিং ॥ ১৫০॥

সর্ব্বমৃত্যুপ্রশমনীং সর্ব্ববিঘ্ননিবারিণীং ।

সর্ব্বাংগসুন্দরীংবন্দে সর্ব্বসৌভাগ্যদাযিনীং ॥ ১৫১॥

সর্ব্বার্থসাধকং চক্রং তত্রাহং নে বিচিন্তযে ।

তত্রাহংতে নমস্যামি কুলোত্তীর্ণাখ্য যোগিনীং ॥ ১৫২॥

সর্ব্বমন্ত্রসনং বন্দে ত্রিপুরাশ্রিযমাশ্রযে ।

কলযামিততো মুদ্রাং সর্ব্বোন্মাদন কারিণীং ॥ ১৫৩॥

অন্তর্দ্দশারে তে দেবি সর্বজ্ঞাং প্রণমাম্যহং ।

সর্ব্বশক্তিংনমস্যামি সর্ব্বৈশ্বর্যপ্রদাং ভজে ॥ ১৫৪॥

সর্ব্বজ্ঞানমযীং বন্দে সর্ব্বব্যাধিবিনাশিনীং ।

সর্ব্বাধারস্বরূপাঞ্চসর্ব্বপাপহরাংভজে ॥ ১৫৫॥

সর্বানন্দময়িং বন্দে সর্ব্বরক্ষাস্বরূপিণীং ।

প্রণমামিমহাদেবীং সর্বেপ্সিত ফলপ্রদাং ॥ ১৫৬॥

সর্ব্বরক্ষাকরং চক্রং সুন্দরীং কলয়ে সদা ।

নিগর্ভযোনীংবন্দে তত্রাহং প্রণমাম্যহং ॥ ১৫৭॥

সাদ্ধ্যসিদ্ধাসনং বন্দে ভজে ত্রিপুরমালিনীং ।

কলযামিততো দেবীং মুদ্রাং সর্ব্বমহাঙ্কুশাং ॥ ১৫৮॥

অষ্টারে বশিনীং বন্দে মহা কামেশ্বরীং ভজে ।

মোদিনীংবিমলাংবন্দে অরুণাজযিনীং ভজে ॥ ১৫৯॥

সর্বেশ্বরীং নমস্যামি কৌলিনীং প্রণমাম্যহং ।

সর্বরোগহরংচক্রং তত্রাহং কলয়ে সদা ॥ ১৬০॥

নমামি ত্রিপুরা সিদ্ধিং ভজে মুদ্রাং চ খেচরীং ।

মহাত্রিকোণবত্বাহ্নচতুরশ্রে কুলেশ্বরি ॥ ১৬১॥

নমামি জৃংভণাবাণং সর্ব্বসংমোহিনীং ভজে ।

পাশংচাপং ভজে নিত্যং ভজে স্তংভনমঙ্কুশং ॥ ১৬২॥

ত্রিকোণেহং জগদ্ধাত্রীং মহাকামেশ্বরীং ভজে ।

মহাবজ্রেশ্বরীংবন্দে মহাশ্রীভগমালিনীং ॥ ১৬৩॥

মহাশ্রীসুন্দরীং বন্দে সর্ব্বকামফলপ্রদাং ।

সর্ব্বসিদ্ধিপ্রদংচক্রং তবদেবি নমাম্যহং ॥ ১৬৪ ॥

নমাম্যতিরহস্যাখ্যাং যোগিনীং তবকামদাং ।

ত্রিপুরাংবাংনমস্যামি বীজামুদ্রামহাংভজে ॥ ১৬৫ ॥

মূলমন্ত্রেণ ললিতে তল্বিন্দৌ পূজযাম্যহং ।

সর্বানন্দমযংচক্রং তবদেবি ভজাম্যহং ॥ ১৬৬॥

পরাং পররহস্যাখ্যাং যোগিনীং তত্রকামদাং ।

মহাচক্রেশ্বরীংবন্দে যোনিমুদ্রামহং ভজে ॥ ১৬৭॥

ধূপদীপাদিকং সর্বমর্প্পিতং কল্পযাম্যহং ।

ত্বল্প্রীতযেমহামুদ্রাং দর্শযামি ততশ্শিবে ॥ ১৬৮॥

শাল্যন্নং মধুসম্যুক্তং পাযসাপূপ সম্যুক্তং ।

ঘৃতসূপসমাযুক্তংদধিক্ষীরসমন্বিতং ॥ ১৬৯॥

সর্ব্বভক্ষ্যসমাযুক্তং বহুশাকসমন্বিতং ।

নিক্ষিপ্যকাঞ্চনে পাত্রে নৈবেদ্যং কল্পযামি তে ॥ ১৭০॥

সঙ্কল্পবিন্দুনা চক্রং কুচৌ বিন্দুদ্বয়েন চ ।

যোনিশ্চসপরার্দ্ধেন কৃত্বা শ্রীললিতে তব ॥ ১৭১॥

এতত্ কামকলা রূপং ভক্তানাং সর্ব্বকামদং ।

সর্ব্বসৌভাগ্যদংবন্দে তত্র ত্রিপুরসুন্দরীং ॥ ১৭২॥

বামভাগে মহেশানি বৃত্তং চ চতুশ্রকং ।

কৃত্বাগন্ধাক্ষতাদ্যৈশ্চাপ্যর্চ্চযামি মহেশ্বরীং ॥ ১৭৩॥

বাগ্দবাদ্যং নমস্যামি তত্র ব্যাপকমণ্ডলং ।

জলযুক্তেনপাণৌ চ শুদ্ধমুদ্রা সমন্বিতং ॥ ১৭৪॥

তত্র মন্ত্রেণ দাস্যামি দেবি তে বলিমুত্তমং ।

নমস্তেদেবদেবেশি নম স্ত্রৈলোক্যবন্দিতে ॥ ১৭৫॥

নমশ্শিববরাঙ্কস্থে নমস্ত্রীপুরসুন্দরি ।

প্রদক্ষিণনমস্কারমনেনাহং করোমি তে ॥ ১৭৬॥

তত সঙ্কল্পমন্ত্রাণাং সমাজং পরমেশ্বরি ।

প্রজপামিমহাবিদ্যাং ত্বত্ প্রীত্যর্থমহং শিবে ॥ ১৭৭॥

তব বিদ্যাং প্রজপ্ত্বাথ নৌমি ত্বাং পরমেশ্বরি ।

মহাদেবিমহেশানি মহাশিবময়ে প্রিয়ে ॥ ১৭৮॥

মহানিত্যে মহাসিদ্ধে ত্বামহং শরণং শিবে ।
জয়ত্বংত্রিপুরে দেবি ললিতে পরমেশ্বরি ॥ ১৭৯॥

সদাশিব প্রিয়ঙ্করি পাহিমাং করুণানিধে ।
জগন্মাতর্জ্জগদ্রূপেজগদীশ্বরবল্লভে ॥ ১৮০॥

জগন্ময়ি জগত্ স্তুত্যে গৌরি ত্বামহমাশ্রয়ে ।
অনাদ্যেসর্ব্বলোকানামাদ্যে ভক্তেষ্টদায়িনি ॥ ১৮১॥

গিরিরাজেন্দ্রতনয়ে নমস্তীপুরসুন্দরি ।
জয়ারীঞ্জয়দেবেশিব্রহ্মমাতর্মহেশ্বরি ॥ ১৮২॥

বিষ্ণুমাতরমাদ্যন্তে হরমাতস্সুরেশ্বরি ।
ব্রহ্ম্যাদিমাতৃসংস্তুত্যে সর্ব্বাভরণ সম্যুক্তে ॥ ১৮৩॥

জ্যোতির্ময়ি মহারূপে পাহিমাং ত্রিপুরে সদা ।
লক্ষ্মীবাণ্যাদিসং পূজ্যে ব্রহ্মবিষ্ণুশিবপ্রিয় ॥ ১৮৪॥

ভজামি তব পাদাব্জং দেবি ত্রিপুরসুন্দরি ।
ত্বল্লীত্যর্থংযতঃ কাঞ্চীচ্ছক্তিং বৈপূজয়াম্যহং ॥ ১৮৫॥

ততশ্চ কেতনাং শক্তিং তর্পযামি মহেশ্বরি ।

তথাপিত্বাং ভজংস্তোষং চিদগ্নৌ চ দদাম্যহং ॥ ১৮৬॥

ত্বল্লীত্যর্থযং মহাদেবি মমাভীষ্টার্থ সিদ্ধযে ।

বদ্ধ্বাত্বাং খৈচরীমুদ্রাং ক্ষমস্বোদ্বাসযাম্যহং ॥ ১৮৭॥

তিষ্তমে হৃদযেনিত্যং ত্রিপুরে পরমেশ্বরি ।

জগদংমহারাজ্ঞি মহাশক্তি শিবপ্রিযে ॥ ১৮৮॥

হৃচ্চক্রে তিষ্তমে নিত্যং মহাত্রিপুরসুন্দরি ।

এতত্ত্রিপুরসুন্দর্যা হৃদযং সর্বকামদং ॥ ১৮৯॥

মহারহস্যং সততং দুর্ল্লভং দৈবতৈরপি ।

সাক্ষাৎসদাশিবেনোক্তং গুহ্যাত্ গুহ্যমনুত্তমং ॥ ১৯০॥

যঃ পতেত্ শ্রদ্ধযা নিত্যং শৃণুযাদ্বা সমাহিতঃ ।

নিত্যপূজাফলংদেব্যাস্সলভেন্নাত্র সংশযঃ ॥ ১৯১॥

পাপৈঃ সমুচ্যতে সদ্যঃ কাযবাক্ক্ সিত্তসংভবৈঃ ।

পূর্বজন্মসমুত্ ভ্রদতৈর্জ্ঞানাজ্ঞকৃতৈরপি ॥ ১৯২॥

সর্বক্রতুষুযত্ পুণ্যং সর্বতীর্থেষু যর্ফলং ।

তৎপুণ্যং লভতে নিত্যং মানবো নাত্র সংশযঃ ॥ ১৯৩॥

অচলাং লভতে লক্ষ্মীং ত্রৈলোক্যেনাতি দুর্লভাং ।

সাক্ষাদ্বিষ্ণুর্মহালক্ষ্ম্যাশীঘ্রমেব ভবিষ্যতি ॥ ১৯৪॥

অষ্টৈশ্বর্য মবাপ্নোতি স শীঘ্রং মানবোত্তমঃ ।

ঘণ্টিকাপাদুকাসিদ্ধ্যাদিষ্টকংশীঘ্রমশ্নুতে ॥ ১৯৫॥

শ্রীমত্ত্রিপুরাংবিকাযৈ নমঃ ।

॥ শ্রীললিতাহৃদযস্তোত্রং সম্পূর্ণং ॥

ওঁতত্ সত্ ॥

Encodedand proofread by Adwaith Menon adwaithmenon at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Lalita Hrudaya Stotram Lyrics in Bengali PDF
% File name : shrIlalitAhRidayastotram.itx
% Category : hRidaya
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit

% Subject : philosophy/hinduism/religion
% Transliterated by : Adwaith Menon adwaithmenon at gmail.com
% Proofread by : Adwaith Menon
% Latest update : June 15, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website